শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ ষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ ষষ্টিতমঃ সর্গঃ ॥

## স্বপরাজযেন ৱিষণ্ণস্য রাৱণস্যাদেশেন সুপ্তস্য কুম্ভকর্ণস্য প্রবোধনং তং দৃষ্টৱা ৱানরাণাং ভযং চ

স প্রৱিশ্য পুরীং লঙ্কাং রামবাণভযার্দিতঃ।
ভগ্নদর্পস্তদা রাজা বভূৱ ৱ্যথিতেন্দ্রিযঃ॥ **6.60.1** ॥

মাতঙ্গ ইৱ সিংহেন গরুডেনেৱ পন্নগঃ।
অভিভূতোঽভৱদ্ রাজা রাঘৱেণ মহাত্মনা॥ **6.60.2** ॥

ব্রহ্মদণ্ডপ্রতীকানাং ৱিদ্যুচ্চলিতৱর্চসাম্।
স্মরন্ রাঘৱবাণানাং ৱিৱ্যথে রাক্ষসেশ্ৱরঃ॥ **6.60.3** ॥

স কাঞ্চনমযং দিৱ্যমাশ্রিত্য পরমাসনম্।
ৱিপ্রেক্ষমাণো রক্ষাংসি রাৱণো ৱাক্যমব্রৱীৎ॥ **6.60.4** ॥

সর্ৱং তৎ খলু মে মোঘং যৎ তপ্তং পরমং তপঃ।
যৎ সমানো মহেন্দ্রেণ মানুষেণ ৱিনির্জিতঃ॥ **6.60.5** ॥

ইদং তদ্ ব্রহ্মণো ঘোরং ৱাক্যং মামভ্যুপস্থিতম্।
মানুষেভ্যো ৱিজানীহি ভযং ৎৱমিতি তত্তথা॥ **6.60.6** ॥

দেৱদানৱগন্ধর্ৱৈর্যক্ষরাক্ষসপন্নগৈঃ।
অৱধ্যৎৱং মযা প্রোক্তং মানুষেভ্যো ন যাচিতম্॥ **6.60.7** ॥

তমিমং মানুষং মন্যে রামং দশরথাত্মজম্।
ইক্ষ্ৱাকুকুলজাতেন অনরণ্যেন যৎ পুরা॥ **6.60.8** ॥

উৎপৎস্যতি হি মদ্বংশপুরুষো রাক্ষসাধম।
যস্ত্ৱাং সপুত্রং সামাত্যং সবলং সাশ্ৱসারথিম্॥ **6.60.9** ॥

নিহনিষ্যতি সঙ্গ্রামে ৎৱাং কুলাধম দুর্মতে।
শপ্তোঽহং ৱেদৱত্যা চ যথা সা ধর্ষিতা পুরা॥ **6.60.10** ॥

সেযং সীতা মহাভাগা জাতা জনকনন্দিনী।
উমা নন্দীশ্ৱরশ্চাপি রম্ভা ৱরুণকন্যকা॥ **6.60.11** ॥

যথোক্তাস্তন্মযা প্রাপ্তং ন মিথ্যা ঋষিভাষিতম্।
এতদেৱ সমাগম্য যত্নং কর্তুমিহার্হথ॥ **6.60.12** ॥

রাক্ষসাশ্চাপি তিষ্ঠন্তু চর্যাগোপুরমূর্ধসু।
স চাপ্রতিমগাম্ভীর্যো দেৱদানৱদর্পহা॥ **6.60.13** ॥

ব্রহ্মশাপাভিভূতস্তু কুম্ভকর্ণো ৱিবোধ্যতাম্।
সমরে জিতমাত্মানং প্রহস্তং চ নিষূদিতম্॥ **6.60.14** ॥

জ্ঞাৎৱা রক্ষোবলং ভীমমাদিদেশ মহাবলঃ।
দ্বারেষু যত্নঃ ক্রিযতাং প্রাকারশ্চাধিরুহ্যতাম্॥ **6.60.15** ॥

নিদ্রাৱশসমাৱিষ্টঃ কুম্ভকর্ণো ৱিবোধ্যতাম্।
সুখং স্ৱপিতি নিশ্চিন্তঃ কামোপহতচেতনঃ॥ **6.60.16** ॥

নৱ সপ্ত দশাষ্টৌ চ মাসান্ স্ৱপিতি রাক্ষসঃ।
মন্ত্রং কৃৎৱা প্রসুপ্তোঽযমিতস্তু নৱমেঽহনি॥ **6.60.17** ॥

তং তু বোধযত ক্ষিপ্রং কুম্ভকর্ণং মহাবলম্।
স হি সঙ্খ্যে মহাবাহুঃ ককুদং সর্ৱরক্ষসাম্।
ৱানরান্ রাজপুত্রৌ চ ক্ষিপ্রমেৱ হনিষ্যতি॥ **6.60.18** ॥

এষ কেতুঃ পরং সঙ্খ্যে মুখ্যো ৱৈ সর্ৱরক্ষসাম্।
কুম্ভকর্ণঃ সদা শেতে মূঢো গ্রাম্যসুখে রতঃ॥ **6.60.19** ॥

রামেণাভিনিরস্তস্য সঙ্গ্রামেঽস্মিন্ সুদারুণে।
ভৱিষ্যতি ন মে শোকঃ কুম্ভকর্ণে ৱিবোধিতে॥ **6.60.20** ॥

কিং করিষ্যাম্যহং তেন শক্রতুল্যবলেন হি।
ঈদৃশে ৱ্যসনে ঘোরে যো ন সাহ্যায কল্পতে॥ **6.60.21** ॥

তে তু তদ্ ৱচনং শ্রুৎৱা রাক্ষসেন্দ্রস্য রাক্ষসাঃ।
জগ্মুঃ পরমসম্ভ্রান্তাঃ কুম্ভকর্ণনিৱেশনম্॥ **6.60.22** ॥

তে রাৱণসমাদিষ্টা মাংসশোণিতভোজনাঃ।
গন্ধং মাল্যং মহদ্ভক্ষ্যমাদায সহসা যযুঃ॥ **6.60.23** ॥

তাং প্রৱিশ্য মহাদ্বারাং সর্ৱতো যোজনাযতাম্।
কুম্ভকর্ণগুহাং রম্যাং পুষ্পগন্ধপ্রৱাহিনীম্॥ **6.60.24** ॥

কুম্ভকর্ণস্য নিঃশ্ৱাসাদৱধূতা মহাবলাঃ।
প্রতিষ্ঠমানাঃ কৃচ্ছ্রেণ যত্নাৎ প্রৱিৱিশুর্গুহাম্॥ **6.60.25** ॥

তাং প্রৱিশ্য গুহাং রম্যাং রত্নকাঞ্চনকুট্টিমাম্।
দদৃশুর্নৈরৃতৱ্যাঘ্রাঃ শযানং ভীমৱিক্রমম্॥ **6.60.26** ॥

তে তু তং ৱিকৃতং সুপ্তং ৱিকীর্ণমিৱ পর্ৱতম্।
কুম্ভকর্ণং মহানিদ্রং সমেতাঃ প্রত্যবোধযন্॥ **6.60.27** ॥

ঊর্ধ্ৱলোমাঞ্চিততনুং শ্ৱসন্তমিৱ পন্নগম্।
ভ্রাময়ন্তং ৱিনিঃশ্ৱাসৈঃ শযানং ভীমৱিক্রমম্॥ **6.60.28** ॥

ভীমনাসাপুটং তং তু পাতালৱিপুলাননম্।
শযনে ন্যস্তসর্ৱাঙ্গং মেদোরুধিরগন্ধিনম্॥ **6.60.29** ॥

কাঞ্চনাঙ্গদনদ্ধাঙ্গং কিরীটেনার্কৱর্চসম্।
দদৃশুর্নৈর্ঋতৱ্যাঘ্রং কুম্ভকর্ণমরিন্দমম্॥ **6.60.30** ॥

ততশ্চক্রুর্মহাত্মানঃ কুম্ভকর্ণস্য চাগ্রতঃ।
ভূতানাং মেরুসঙ্কাশং রাশিং পরমতর্পণম্॥ **6.60.31** ॥

মৃগাণাং মহিষাণাং চ ৱরাহাণাং চ সঞ্চযান্।
চক্রুর্নৈর্ঋতশার্দূলা রাশিমন্নস্য চাদ্ভুতম্॥ **6.60.32** ॥

ততঃ শোণিতকুম্ভাংশ্চ মাংসানি ৱিৱিধানি চ।
পুরস্তাৎ কুম্ভকর্ণস্য চক্রুস্ত্রিদশশত্রৱঃ॥ **6.60.33** ॥

লিলিপুশ্চ পরার্ধ্যেন চন্দনেন পরন্তপম্।
দিৱ্যৈরাশ্ৱাসযামাসুর্মাল্যৈর্গন্ধৈশ্চ গন্ধিভিঃ॥ **6.60.34** ॥

ধূপগন্ধাংশ্চ সসৃজুস্তুষ্টুৱুশ্চ পরন্তপম্।
জলদা ইৱ চানেদুর্যাতুধানাস্ততস্ততঃ॥ **6.60.35** ॥

শঙ্খাংশ্চ পূরযামাসুঃ শশাঙ্কসদৃশপ্রভান্।
তুমুলং যুগপচ্চাপি ৱিনেদুশ্চাপ্যমর্ষিতাঃ॥ **6.60.36** ॥

নেদুরাস্ফোটযামাসুশ্চিক্ষিপুস্তে নিশাচরাঃ।
কুম্ভকর্ণৱিবোধার্থং চক্রুস্তে ৱিপুলং স্বরম্॥ **6.60.37** ॥

সশঙ্খভেরীপণৱপ্রণাদং
 সাস্ফোটিতক্ষ্ৱেলিতসিংহনাদম্।

দিশো দ্রৱন্তস্ত্রিদিৱং কিরন্তঃ
 শ্রুৎৱা ৱিহঙ্গাঃ সহসা নিপেতুঃ॥ **6.60.38**॥

যদা ভৃশং তৈর্নিনদৈর্মহাত্মা
 ন কুম্ভকর্ণো বুবুধে প্রসুপ্তঃ।
ততো ভুশুণ্ডীর্মুসলানি সর্ৱে
 রক্ষোগণাস্তে জগৃহুর্গদাশ্চ॥ **6.60.39**॥

তং শৈলশৃঙ্গৈর্মুসলৈর্গদাভি -
 র্ৱক্ষঃস্থলে মুদ্গরমুষ্টিভিশ্চ।
সুখপ্রসুপ্তং ভুৱি কুম্ভকর্ণং
 রক্ষাস্যুদগ্রাণি তদা নিজঘ্নুঃ॥ **6.60.40**॥

তস্য নিঃশ্ৱাসৱাতেন কুম্ভকর্ণস্য রক্ষসঃ।
রাক্ষসাঃ কুম্ভকর্ণস্য স্থাতুং শেকুর্ন চাগ্রতঃ॥ **6.60.41**॥

ততঃ পরিহিতা গাঢং রাক্ষসা ভীমৱিক্রমাঃ।
মৃদঙ্গপণৱান্ ভেরীঃ শঙ্খকুম্ভগণাংস্তথা॥ **6.60.42**॥

দশ রাক্ষসসাহস্রং যুগপৎপর্যৱারযৎ।
নীলাঞ্জনচযাকারং তে তু তং প্রত্যবোধযন্॥ **6.60.43**॥

অভিঘ্নন্তো নদন্তশ্চ ন চ সম্বুবুধে তদা।
যদা চৈনং ন শেকুস্তে প্রতিবোধযিতুং তদা॥ **6.60.44**॥

ততো গুরুতরং যত্নং দারুণং সমুপাক্রমন্।
অশ্ৱানুষ্ট্রান্ খরান্ নাগাঞ্জঘ্নুর্দণ্ডকশাঙ্কুশৈঃ॥ **6.60.45**॥

ভেরীশঙ্খমৃদঙ্গাংশ্চ সর্ৱপ্রাণৈরৱাদযন্।
নিজঘ্নুশ্চাস্য গাত্রাণি মহাকাষ্ঠকটঙ্করৈঃ॥ **6.60.46**॥

মুদ্গরৈর্মুসলৈশ্চাপি সর্ৱপ্রাণসমুদ্যতৈঃ।
তেন নাদেন মহতা লঙ্কা সর্ৱা প্রপূরিতা।
সপর্ৱতৱনা সর্ৱা সোঽপি নৈৱ প্রবুধ্যতে॥ **6.60.47**॥

ততো ভেরীসহস্রং তু যুগপৎ সমহন্যত।
মৃষ্টকাঞ্চনকোণানামসক্তানাং সমন্ততঃ॥ **6.60.48**॥

এৱমপ্যতিনিদ্রস্তু যদা নৈৱ প্রবুধ্যতে।
শাপস্য ৱশমাপন্নস্ততঃ ক্রুদ্ধা নিশাচরাঃ॥ **6.60.49**॥

ততঃ কোপসমাৱিষ্টাঃ সর্ৱে ভীমপরাক্রমাঃ।
তদ্ রক্ষো বোধযিষ্যন্তশ্চক্রুরন্যে পরাক্রমম্॥ **6.60.50**॥

অন্যে ভেরীঃ সমাজঘ্নুরন্যে চক্রুর্মহাস্ৱনম্।
কেশানন্যে প্রলুলুপুঃ কর্ণানন্যে দশন্তি চ॥ **6.60.51**॥

উদকুম্ভশতানন্যে সমসিঞ্চন্ত কর্ণযোঃ।
ন কুম্ভকর্ণঃ পস্পন্দে মহানিদ্রাৱশং গতঃ॥ **6.60.52**॥

অন্যে চ বলিনস্তস্য কূটমুদ্গরপাণযঃ।
মূর্ধ্নি ৱক্ষসি গাত্রেষু পাতযন্ কূটমুদ্গরান্॥ **6.60.53**॥

রজ্জুবন্ধনবদ্ধাভিঃ শতঘ্নীভিশ্চ সর্ৱতঃ।
ৱধ্যমানো মহাকাযো ন প্রাবুধ্যত রাক্ষসঃ॥ **6.60.54**॥

ৱারণানাং সহস্রং চ শরীরেঽস্য প্রধাৱিতম্।
কুম্ভকর্ণস্তদা বুদ্ধ্ৱা স্পর্শং পরমবুধ্যত॥ **6.60.55**॥

স পাত্যমানৈর্গিরিশৃঙ্গৱৃক্ষৈ -
রচিন্তযংস্তান্ ৱিপুলান্ প্রহারান্।

নিদ্রাক্ষযাৎ ক্ষুদ্ভযপীডিতশ্চ
ৱিজৃম্ভমাণঃ সহসোৎপপাত ॥ **6.60.56** ॥

স নাগভোগাচলশৃঙ্গকল্পৌ
ৱিক্ষিপ্য বাহূ জিতৱজ্রসারৌ।
ৱিৱৃত্য ৱক্ত্রং ৱডৱামুখাভং
নিশাচরোঽসৌ ৱিকৃতং জজৃম্ভে ॥ **6.60.57** ॥

তস্য জাজৃম্ভমাণস্য ৱক্ত্রং পাতালসন্নিভম্।
দদৃশে মেরুশৃঙ্গাগ্রে দিৱাকর ইৱোদিতঃ ॥ **6.60.58** ॥

স জৃম্ভমাণোঽতিবলঃ প্রবুদ্ধস্তু নিশাচরঃ।
নিঃশ্ৱাসশ্চাস্য সঞ্জজ্ঞে পর্ৱতাদিৱ মারুতঃ ॥ **6.60.59** ॥

রূপমুত্তিষ্ঠতস্তস্য কুম্ভকর্ণস্য তদ্ বভৌ।
যুগান্তে সর্ৱভূতানি কালস্যেৱ দিধক্ষতঃ ॥ **6.60.60** ॥

তস্য দীপ্তাগ্নিসদৃশে ৱিদ্যুৎসদৃশৱর্চসী।
দদৃশাতে মহানেত্রে দীপ্তাৱিৱ মহাগ্রহৌ ॥ **6.60.61** ॥

ততস্ত্ৱদর্শযন্ সর্ৱান্ ভক্ষ্যাংশ্চ ৱিৱিধান্ বহূন্।
ৱরাহান্ মহিষাংশ্চৈৱ বভক্ষ স মহাবলঃ ॥ **6.60.62** ॥

আদদ্ বুভুক্ষিতো মাংসং শোণিতং তৃষিতোঽপিবৎ।
মেদঃকুম্ভাংশ্চ মদ্যাংশ্চ পপৌ শক্ররিপুস্তদা ॥ **6.60.63** ॥

ততস্তৃপ্ত ইতি জ্ঞাৎৱা সমুৎপেতুর্নিশাচরাঃ।
শিরোভিশ্চ প্রণম্যৈনং সর্ৱতঃ পর্যৱারযন্ ॥ **6.60.64** ॥

নিদ্রাৱিশদনেত্রস্তু কলুষীকৃতলোচনঃ।
চারযন্ সর্ৱতো দৃষ্টিং তান্ দদর্শ নিশাচরান্ ॥ **6.60.65** ॥

স সর্ব্বান্ সান্ত্বযামাস নৈরৃতান্ নৈরৃতর্ষভঃ।
বোধনাদ্ ৱিস্মিতশ্চাপি রাক্ষসানিদমব্রৱীৎ॥ **6.60.66** ॥

কিমর্থমহমাদৃত্য ভৱদ্ভিঃ প্রতিবোধিতঃ।
কচ্চিৎ সুকুশলং রাজ্ঞো ভযং ৱা নেহ কিঞ্চন॥ **6.60.67** ॥

অথৱা ধ্রুৱমন্যেভ্যো ভযং পরমুপস্থিতম্।
যদর্থমেৱ ৎৱরিতৈর্ভৱদ্ভিঃ প্রতিবোধিতঃ॥ **6.60.68** ॥

অদ্য রাক্ষসরাজস্য ভযমুৎপাটযাম্যহম্।
দারযিষ্যে মহেন্দ্রং ৱা শীতযিষ্যে তথানলম্॥ **6.60.69** ॥

ন হ্যল্পকারণে সুপ্তং বোধযিষ্যতি মাদৃশম্।
তদাখ্যাতার্থতত্ত্বেন মৎপ্রবোধনকারণম্॥ **6.60.70** ॥

এৱং ব্রুৱাণং সংরব্ধং কুম্ভকর্ণমরিন্দমম্।
যূপাক্ষঃ সচিৱো রাজ্ঞঃ কৃতাঞ্জলিরভাষত॥ **6.60.71** ॥

ন নো দেৱকৃতং কিঞ্চিদ্ ভযমস্তি কদাচন।
মানুষান্নো ভযং রাজংস্তুমুলং সম্প্রবাধতে॥ **6.60.72** ॥

ন দৈত্যদানৱেভ্যো ৱা ভযমস্তি ন নঃ ক্বচিৎ।
যাদৃশং মানুষং রাজন্ ভযমস্মানুপস্থিতম্॥ **6.60.73** ॥

ৱানরৈঃ পর্ৱতাকারৈর্লঙ্কেযং পরিৱারিতা।
সীতাহরণসন্তপ্তাদ্ রামান্নস্তুমুলং ভযম্॥ **6.60.74** ॥

একেন ৱানরেণেযং পূর্ৱং দগ্ধা মহাপুরী।
কুমারো নিহতশ্চাক্ষঃ সানুযাত্রঃ সকুঞ্জরঃ॥ **6.60.75** ॥

স্ৱযং রক্ষোধিপশ্চাপি পৌলস্ত্যো দেৱকণ্টকঃ।
ৱ্রজেতি সংযুগে মুক্তো রামেণাদিত্যৱর্চসা॥ **6.60.76** ॥

যন্ন দেৱৈঃ কৃতো রাজা নাপি দৈত্যৈর্ন দানৱৈঃ।
কৃতঃ স ইহ রামেণ ৱিমুক্তঃ প্রাণসংশযাৎ॥ **6.60.77** ॥

স যূপাক্ষৱচঃ শ্রুৎৱা ভ্রাতুর্যুধি পরাভৱম্।
কুম্ভকর্ণো ৱিৱৃত্তাক্ষো যূপাক্ষমিদমব্রৱীৎ॥ **6.60.78** ॥

সর্ৱমদ্যৈৱ যূপাক্ষ হরিসৈন্যং সলক্ষ্মণম্।
রাঘৱং চ রণে জিৎৱা ততো দ্রক্ষ্যামি রাৱণম্॥ **6.60.79** ॥

রাক্ষসাংস্তর্পযিষ্যামি হরীণাং মাংসশোণিতৈঃ।
রামলক্ষ্মণযোশ্চাপি স্ৱযং পাস্যামি শোণিতম্॥ **6.60.80** ॥

তৎ তস্য ৱাক্যং ব্রুৱতো নিশম্য
সগর্ৱিতং রোষৱিৱৃদ্ধদোষম্।
মহোদরো নৈরৃতযোধমুখ্যঃ
কৃতাঞ্জলির্ৱাক্যমিদং বভাষে॥ **6.60.81** ॥

রাৱণস্য ৱচঃ শ্রুৎৱা গুণদোষৌ ৱিমৃশ্য চ।
পশ্চাদপি মহাবাহো শত্রূন্ যুধি ৱিজেষ্যসি॥ **6.60.82** ॥

মহোদরৱচঃ শ্রুৎৱা রাক্ষসৈঃ পরিৱারিতঃ।
কুম্ভকর্ণো মহাতেজাঃ সম্প্রতস্থে মহাবলঃ॥ **6.60.83** ॥

সুপ্তমুত্থাপ্য ভীমাক্ষং ভীমরূপপরাক্রমম্।
রাক্ষসাস্ত্ৱরিতা জগ্মুর্দশগ্রীৱনিৱেশনম্॥ **6.60.84** ॥

তেঽভিগম্য দশগ্রীৱমাসীনং পরমাসনে।
ঊচুর্বদ্ধাঞ্জলিপুটাঃ সর্ৱ এৱ নিশাচরাঃ॥ **6.60.85** ॥

কুম্ভকর্ণঃ প্রবুদ্ধোঽসৌ ভ্রাতা তে রাক্ষসেশ্ৱর।
কথং তত্রৈৱ নির্যাতু দ্রক্ষ্যসে তমিহাগতম্॥ **6.60.86** ॥

রাৱণস্ত্বব্রৱীদ্ধৃষ্টো রাক্ষসাংস্তানুপস্থিতান্।
দ্রষ্টুমেনমিহেচ্ছামি যথান্যাযং চ পূজ্যতাম্॥ **6.60.87** ॥

তথেত্যুক্ত্বা তু তে সর্ৱে পুনরাগম্য রাক্ষসাঃ।
কুম্ভকর্ণমিদং ৱাক্যমূচূ রাৱণচোদিতাঃ॥ **6.60.88** ॥

দ্রষ্টুং ৎৱাং কাঙ্ক্ষতে রাজা সর্ৱরাক্ষসপুঙ্গৱঃ।
গমনে ক্রিযতাং বুদ্ধির্ভ্রাতরং সম্প্রহর্ষয॥ **6.60.89** ॥

কুম্ভকর্ণস্তু দুর্ধর্ষো ভ্রাতুরাজ্ঞায শাসনম্।
তথেত্যুক্ত্বা মহাৱীর্যঃ শযনাদুৎপপাত হ॥ **6.60.90** ॥

প্রক্ষাল্য ৱদনং হৃষ্টঃ স্নাতঃ পরমহর্ষিতঃ।
পিপাসুস্ত্বরযামাস পানং বলসমীরণম্॥ **6.60.91** ॥

ততস্তে ৎৱরিতাস্তত্র রাক্ষসা রাৱণাজ্ঞযা।
মদ্যং ভক্ষ্যাংশ্চ ৱিৱিধান্ ক্ষিপ্রমেৱোপহারযন্॥ **6.60.92** ॥

পীৎৱা ঘটসহস্রে দ্ৱে গমনাযোপচক্রমে।
ঈষৎসমুৎকটো মত্তস্তেজোবলসমন্ৱিতঃ॥ **6.60.93** ॥

কুম্ভকর্ণো বভৌ রুষ্টঃ কালান্তকযমোপমঃ।
ভ্রাতুঃ স ভৱনং গচ্ছন্ রক্ষোবলসমন্ৱিতঃ।
কুম্ভকর্ণঃ পদন্যাসৈরকম্পযত মেদিনীম্॥ **6.60.94** ॥

স রাজমার্গং ৱপুষা প্রকাশযন্
সহস্ররশ্মির্ধরণীমিৱাংশুভিঃ।
জগাম তত্রাঞ্জলিমালযা ৱৃতঃ
শতক্রতুর্গেহমিৱ স্ৱযম্ভুৱঃ॥ **6.60.95** ॥

তং রাজমার্গস্থমমিত্রঘাতিনং
  ৱনৌকসস্তে সহসা বহিঃ স্থিতাঃ।
দৃষ্টৱাপ্রমেযং গিরিশৃঙ্গকল্পং
  ৱিতত্রসুস্তে সহ যূথপালৈঃ॥ **6.60.96**॥

কেচিচ্ছরণ্যং শরণং স্ম রামং
  ৱ্রজন্তি কেচিদ্ ৱ্যথিতাঃ পতন্তি।
কেচিদ্ দিশশ্চ ৱ্যথিতাঃ পতন্তি
  কেচিদ্ ভযার্তা ভুৱি শেরতে স্ম॥ **6.60.97**॥

তমদ্রিশৃঙ্গপ্রতিমং কিরীটিনং
  স্পৃশন্তমাদিত্যমিৱাত্মতেজসা।
ৱনৌকসঃ প্রেক্ষ্য ৱিৱৃদ্ধমদ্ভুতং
  ভযার্দিতা দুদ্রুৱিরে যতস্ততঃ॥ **6.60.98**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে ষষ্টিতমঃ সর্গঃ ॥